Shri Raghunath Temple MSS. Library,
JAMMU

No. १२६७

Title लिङ्गोपहित लैङ्गिकभान-

Author — × — निरास रहस्यम्

Extent ८. Age ×

Subject न्यायशास्त्र मू.

लिङ्गोपहित लैङ्गिकभाननिरासरहस्यम्

१२६७

लिंगोपहित
लैंगिकभान
निरासवादा
र्थपुस्तकं॥

श्रीगणेशाय नमः॥

॥शिवव्याप्तं।चैशेषिकानां लिंगोपहितलैंगिकमात्रानाभ्युपगमो निर्युक्तिकत्वेनाश्रद्धेयः॥नहिवह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शजन्यानुमितौ वह्निव्या
प्यधूमवत्त्वपलिंगोपहितेपर्वते लैंगिकस्य विधेयताभानमनुभवासिद्धं येनानुभवबलादेव तदभ्युपगमः॥पर्वतत्वव ह्निव्याप्यत्वादेर्भानस्यानुपर्वतेवह्निमनुमिनोमीत्यनु
व्यवसायवशादेवाभ्युपगमात्‌ न च साध्यव्याप्यहेतुप्रकारकपक्षज्ञानात्मकस्य साध्यव्याप्यहेतुविशिष्टपक्षविशेष्यकवैशिष्ट्यबुद्धिकारणस्य सत्त्वादेव त
ज्ञानमिति वाच्यं॥तथा सति पूर्वोपस्थितानां उदासीनानामपि संसर्गाणां वदा र्थानामनुमितौ भानापत्तेः तेषामपि विशिष्टबुद्धिकारणसत्त्वात्‌ साध्यव्याप्यहे
तुविशिष्टपक्षविशेष्यकवैशिष्ट्यबोधकारणवत्ताहेतोः पक्षे निरूपितवैशिष्ट्यबोधकारणस्यापि सत्त्वेन तथाबोधस्यापत्तेः इति नैयायिकाः॥केचि
त्तु॥वह्निव्याप्यधूमवत्पर्वतो वह्निव्याप्यालोकवांश्च वह्निव्याप्यधूमवानित्यादि धूमालोकादिलिंगकवह्निव्याप्यधूमवत्पर्वतपक्षकपरामर्शाद्वह्निव्या
प्यधूमवत्पर्वतो वह्निमानित्याकारिका वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निविशेषणिकानुमितिः सर्वसिद्धा वैशेषिकैरपि तत्र पक्षतावच्छेद
कातिरिक्तलिंगोपहितलैंगिकभानस्वीकारः एव न तत्रैव तादृशानुमितित्वावच्छिन्नं प्रति वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमालो १

लिं॰ १ रिमत्तानिश्चयत्वेन न कारणत्वं परस्परं व्यभिचाराज्ञोरवाद्य॰ किन्तु पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमवत्तानिश्चयत्वेन कारणत्वं॰ तथा च सर्वत्रैव वह्निव्याप्यधूम
वान्पर्वत इति परामर्शान्नाहृशानुमितिर्जायते॰ सामग्रीसत्वात्॰ एवं वह्निव्याप्यालोकवान्पर्वतो वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवानित्यालोकधूमादिलिंगकवह्नि
व्याप्यालोकादिमत्पर्वतपक्षकपरामर्शाद्वह्निव्याप्यालोकवान्पर्वतो वह्निमानित्याकारिका वह्निव्याप्यालोकवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निविधेयकानुमितिः
सर्वसिद्धाः तत्र च तादृशानुमितित्वावच्छिन्नं प्रति अनुगतत्वाज्ञाद्यकाद्यपर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यालोकादिमत्तानिश्चयत्वेनैव कारणत्वं कल्पने सर्वत्रैव व
ह्निव्याप्यालोकवान्पर्वत इति परामर्शान्नाहृशेपि वानुमितिर्जायते सामग्रीसत्वादिति क्रमेण सर्वत्रैव लिंगोपहितलैंगिकभानमावश्यकं॰ न च वह्निव्याप्यधूमवत्पर्वतत्वाव
च्छेदकवत्सामानाधिकरण्याभ्यामनुमितिं प्रति वह्निव्याप्यधूमवत्पर्वतत्वावच्छेदकतत्सामानाधिकरण्याभ्यां व्याप्यवत्तापरामर्शयोर्हेतुत्वमावश्यकं अन्यथा वह्निव्या राम
प्यधूमवत्पर्वतत्वसामानाधिकरण्यमात्रेण परामर्शादपि पर्वतत्वावच्छेदकावच्छेदेनानुमित्यापत्तेः तथा च कथं लाघवमिति वाच्यं॥ प्रकृतावच्छेदकावच्छेदेनानुमितिं प्र १
तिबाधसिद्ध्यभावमात्रस्य नियामकतया वह्निव्याप्यधूमवत्पर्वतत्वसामानाधिकरण्यमात्रेण व्याप्यवत्तापरामर्शादपि तदवच्छेदेनानुमितेरिष्टत्वात्॥ न चैवं वह्नि

व्याप्यधूमवान्पर्वतो वह्निमानिति सिद्धिसत्वेपि नासिसाधयिषा वह्निव्याप्यधूमवान्पर्वत इति परामर्शादनुमितिर्न स्यात् तादृशसिद्धिसत्वे वह्निव्याप्यधूमवान्पर्वतो
वह्निमानित्यनुमितेरसंभवादिति वाच्यं॥ इष्टत्वात्। न्यायनयेपि नीलपर्वतो वह्निमानिति सिद्धेर्वह्निव्याप्यधूमवत्पर्वतो वह्निमानिति सिद्धेरपि पर्वतो वह्निमानित्यनुमि
ति प्रतिबंधकतया तादृशसिद्धिसत्वे वह्निव्याप्यधूमवान्पर्वत इति परामर्शादनुमित्सुत्पादनाभ्युपगमात् प्रतिबध्यता हि सामान्यघटितविशेषधर्मावच्छिन्नविशेष्यका
नुमितित्वसामान्यघटितविशेषधर्मावच्छिन्नप्रकारका सिद्धिश्च सामान्यधर्मावच्छिन्नविधेयकानुमिति न च तथापि उत्पतौ न वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्ने च धूमाभावलौ
किकप्रत्यक्षात्मकस्य वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यादिबाधनिश्चयसत्वे वह्निव्याप्यधूमवान्पर्वत इति परामर्शादनुमितिर्न स्यात्। तादृशबाधनिश्चयसत्वे वह्नि
व्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेरसंभवादिति वाच्यम्॥ निर्वह्निमान् वह्निव्याप्यधूमवान् वह्निमांश्च नित्यादिज्ञानवत् तादृशाकारज्ञानस्याप्यसिद्धेः। न च तथापि वह्नि
व्याप्यधूमाभाववान्पर्वत इत्याद्युपनीतभानाद्यात्मकबाधनिश्चये सत्येवोत्पन्ने वह्निव्याप्यधूमवान्पर्वत इति लौकिकप्रत्यक्षात्मकपरामर्शादनुमितिर्न स्यात्। अनुमितिं प्र
त्युपनीतभानात्मकबाधनिश्चयस्याप्रतिबंधकतया तादृशबाधनिश्चयसत्वे वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेरसंभवादिति वाच्यम्॥ तत्र तादृशबाधनिश्चयस

लिं० २

त्वेव वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेरसंभवेपि पर्वतो वह्निमानिति केवलपर्वतत्वावच्छिन्नोद्देश्यकानुमित्युत्पत्तौ बाधकाभावात्। वैशेषिकैरपि तत्र सति बाधक एव
लिंगोपहितलैंगिकभानाभ्युपगमात्। वह्निव्याप्यधूमवत्पर्वतत्वनिष्ठविधेयत्वेन पर्वतत्वावच्छिन्नोद्देश्यकवह्निविधेयकधूमलिंगकत्वेन कार्यकारणभावस्य नैयायिकवद्वैशे
षिकैरभ्युपगमात्। न्यायेन ये वह्निव्याप्यालोकवान्वह्निव्याप्यधूमवत्पर्वत इति वह्निव्याप्यधूमवत्पर्वतपक्षकपरामर्शजन्यानुमितेर्द्विविधविषयत्ववदसति बाध
के सर्वत्रैवानुमितेर्द्विविधविषयत्वस्य वैशेषिकानामिष्टत्वादिति वैशेषिकमतं परिष्कुर्वंति॥ ॥तदसत्॥ ॥वह्निव्याप्यधूमवान्पर्वत इति परामर्शादपि वह्निव्याप्य
धूमवान्पर्वतो वह्निमानित्यनुमित्यभ्युपगमे धूमालोकादिलिंगकवह्निव्याप्यधूमवत्पर्वतपक्षकपरामर्शस्थले वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निविधेयका
नुमितित्वावच्छिन्नं प्रति लाघवात्पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमवत्त्वानिष्ठयत्वेन कारणत्वाभ्युपगमस्यापि अर्थत्वापत्तेः वह्निव्याप्यधूमविशिष्टपर्वतविशे
ष्यकवैशिष्ट्यबुद्धिसामान्यं प्रति वह्निमान्नीलपर्वत इति परामर्शादिव वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्यभ्युपगमे धूमालोकादिलिंगकवह्निव्याप्यधूमवत्प राम
र्वतपक्षकपरामर्शस्थले वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति लाघवात्पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमवत्त्वानिष्ठ २
यत्वेन कारणत्वाभ्युपगमस्यापि अर्थत्वाप --- ः वह्निव्याप्यधूमविशिष्टपर्वतविशेष्यकवैशिष्ट्यबुद्धिसामान्यं प्रति वह्निव्याप्यधूमप्रकारकपर्वतनिष्ठप०

त्वेन कारणत्वस्यावश्यं वक्तव्यतया तेनैव गतार्थत्वात्। पर्वतो वह्निमानिति सिद्धिसत्त्वेपि विनापि साध्यपिपासां वह्निव्याप्यधूमवान्नीलपर्वत इति परामर्शाद्दिव वह्निव्याप्य
धूमवान्पर्वत इति परामर्शादनुमितिप्रसंगाच्च॥ तादृशसिद्धिसत्त्वे पर्वतो वह्निमानित्यनुमितेरसंभवेपि वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्युत्पत्तेर्बाधकाभा
वात्॥ न च तत्र पर्वतो वह्निमानित्यनुमित्यनुत्पत्तावपि वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्युत्पत्तौ वैशेषिकाणामिष्टापत्तिरिति वाच्यं॥ तथा सति नैयायिकैस्त
त्रानुमितौ मानस्त्वनुव्यवसायानभ्युपगमापत्तेः: सममनुभवकलहापत्तेः: न च पर्वतो वह्निमानिति सिद्धेर्वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्निविधेय
कानुमितिप्रतिबंधकत्वेतिवाच्यं॥ लिंगभेदेन गुरुतरानेकप्रतिबध्यप्रतिबंधकभावकल्पनापत्तेः॥ वह्निव्याप्यधूमालोकालिङ्गिमान्वह्निव्याप्यधूमवत्पर्वत च
इति वह्निव्याप्यधूमवत्पर्वतत्वप्रकारकपरामर्शादपि पर्वतो वह्निमानिति सिद्धिसत्त्वे वह्निव्याप्यधूमवत्पर्वतविशेष्यकवह्निविधेयकानुमित्यनुत्पत्त्यापत्तेश्च॥ अत
एव पर्वतत्वपर्याप्तोद्देश्यतावच्छेदकताकवह्न्यनुमितिव्यतिरिक्तवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकवह्न्यनुमितेरलीकतया सामान्यसामग्रीविरहा
देव पर्वतो वह्निमानिति सिद्धिसत्त्वे वह्निव्याप्यधूमवान्पर्वत इति परामर्शात् वह्निव्याप्यधूमवत्पर्वतो वह्निमानित्यनुमितिः॥ ननु प्रतिबध्यप्रतिबंधकभावान्तर

लि॰ ३ कल्पनमित्युक्तावपि नातिविस्तारः॥ तथा सति वह्निव्याप्यालोकवान् वह्निव्याप्यधूमवत्पर्वत इति वह्निव्याप्यधूमवत्पर्वतपक्षकपरामर्शाद्विपर्वतो वह्निमा
निति सिद्धिसत्वे तादृशानुमित्यनुत्पत्त्यापत्तेः॥ ॥वस्तुतस्तु॥ वह्निव्याप्यधूमवान्पर्वत इति परामर्शानंतरं पर्वतत्वविशिष्टे वह्निमनुमिनोमीत्येवानुव्यवसायो न तु
3 वह्निव्याप्यधूमवत्पर्वतत्वविशिष्टे वह्निमनुमिनोमीति। वैशेषिकमतेव तादृशानुव्यवसायोपि दुर्वारः। न च तादृशपरामर्शजन्यानुमितौ नो वह्निव्याप्यधू आ
मवत्पर्वतत्वस्य विशेष्यतावच्छेदकत्वेपि नोद्देश्यतावच्छेदकत्वं उद्देश्यतावच्छेदकत्वस्य केवलपर्वतत्व एव वैशेषिकैरभ्युपगमात् अतो न तादृशानुव्यव
साय इति वाच्यं॥ तथा सत्यालोकादिलिंगकवह्निव्याप्यधूमवत्पर्वतपक्षकपरामर्शानंतरमपि तादृशानुव्यवसायानुत्पत्तेः। अत्र विशिष्टपर्वतत्वस्योद्देश्यताव
च्छेदकत्वं वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्थलेव विशिष्टपर्वतत्वस्य तथात्वमित्यस्य च विना सामग्रीभेदं वक्तुमशक्यत्वात्॥ ॥अन्ये तु॥ ॥लिंगभेदेन राम
व्याप्तिभेदेन च भिन्नानां परामर्शानां स्वात्तंजन्यानुमितिं प्रति न हेतुत्वं परस्परं व्यभिचारात् गौरवाच्च किंतु तत्तद्धर्मावच्छिन्नोद्देश्यकतद्धर्मावच्छिन्नविधेयकानुमितित्वाव ३
च्छिन्नं प्रति तत्तद्धर्मावच्छिन्नविशेष्यकतत्तद्धर्मावच्छिन्नविशेष्यकतत्तद्धर्मावच्छिन्नप्रकारकसिद्ध्यभावमात्रं कारणं अनुगतत्वादावश्यकत्वाल्लाघवाच्च एवं च सति व

ह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शविरहदशायामपि सिद्धमौर्विमावाप्यर्वतो वह्निमानित्यादिपर्वतत्वाद्यवच्छिन्नोद्देश्यकवह्नित्वाद्यवच्छिन्नविधेयकानुमित्यापत्तिः।
अतस्तद्वारणाय सर्वत्रैव लिंगोपहितलैंगिकभानं वैशेषिकैरुपेयते। तथा च वह्निव्याप्यधूमालोकादिमत्पर्वतत्वादिविशिष्टाधिकरणकवैशिष्ट्यबोधभिन्नायाः पर्व
तत्वावच्छिन्नोद्देश्यकवह्नित्वाद्यवच्छिन्नविधेयकानुमितेः स्वीकृततया तादृशपर्वतत्वविशिष्टाधिकरणकवैशिष्ट्यबोधकारणीभूतस्य तादृशपर्वतत्वादिप्रकार
कनिश्चयस्य विरहादेव परामर्शादिविरहदशायां नानुमितिः। कारणासमाजस्य कार्यविघटकत्वात्। न च तथापि पक्षतावच्छेदकतत्सामानाधिकरण्याभ्यामनु
मितिं प्रति पक्षतावच्छेदकतत्सामानाधिकरण्याभ्यां परामर्शयोर्हेतुत्वमावश्यकं अन्यथा पक्षतावच्छेदकसामानाधिकरण्यमात्रेण परामर्शादपि पक्ष
तावच्छेदकावच्छेदेनानुमित्युत्पादापत्तेरिति वाच्यं॥ वैशेषिकाणां पक्षतावच्छेदेन साध्यव्याप्यहेतुमत्ताविशिष्टवैशिष्ट्यावगाहिभिन्नायाः पक्षतावच्छेदेनानुमिते
स्वीकृतत्वेन पक्षतावच्छेदकसामानाधिकरण्यमात्रेण परामर्शात्तादृशानुमितेरसंभवात्॥ विशिष्टाधिकरणकवैशिष्ट्यबुद्धिं प्रति विशेष्यतावच्छेदकतावच्छेदक
संबंधेन विशेष्यतावच्छेदकप्रकारककनिश्चयस्य हेतुत्वात् तन्मते पक्षतावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धिबाधयोरभावमात्रस्य नियामकत्वं पक्षतावच्छे

लिं॰ दकसामानाधिकरण्यमात्रेणपरामर्शादपितदवच्छेदेनानुमितेरिष्टत्वाच्च। अनवसर्वत्रलिंगोपहितलैंगिकभानाभ्युपगमेवह्निव्याप्यधूमवान्पर्वतइतिपराम

र्शादपितदवच्छेदेनानुमितेरिष्टत्वाच्च। नवसर्वत्रलिंगोपहितलैंगिकभानाभ्युपगमेवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शादनंतरमपिपर्वतत्वविशिष्टेवह्निम

४ मनुमितोमीत्यनुव्यवसायवद्वह्निव्याप्यधूमवत्पर्वतत्वविशिष्टेवह्निमनुमिनोमीत्यनुव्यवसायापत्तिरितिवाच्यं॥ ईदृशपरामर्शजन्यानुमितौवह्निव्याप्यधूमवत्प

५ र्वतत्वस्यविशेष्यतावच्छेदकत्वेपिउद्देश्यतानवच्छेदकत्वात्केवलपर्वतत्वस्यैवतत्रोद्देश्यतावच्छेदकत्वात्। सर्वत्रानुमितेर्विशेष्यतावच्छेदकसंबंधेनविशेष्यता

ताद्धर्म्या॰ एकाउद्देश्यताव्यविषयतावच्छेदकत्वंसाचकेवलपक्षतावच्छेदकपर्याप्ता॰ अपरावतादितरविशेष्यतावच्छेदकतारूपासावसाध्यव्याप्यहेतुमत्पक्ष

तावच्छेदकेपर्याप्तेत्यभ्युपगमात्॥ नचवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शानंतरवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नोद्देश्यकानुमितिरेवकुतोनजायतेसि

द्ध्यभावसत्वादितिवाच्यं॥ वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नाधिकरणवैशिष्ट्यबोधभिन्नायावह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नोद्देश्यकानुमितेरलीकतया राम ४

तादृशविशिष्टाधिकरणकवैशिष्ट्यबोधसामान्यकारणीभूतस्यवह्निव्याप्यधूमवत्पर्वतपक्षकवह्निव्याप्यधूमादिपरामर्शस्यविरहादेवतदानीमनु

मित्यनुत्पत्तेः॥ एतेनपर्वतोवह्निमानितिसिद्धिसत्वेपिवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शादनुमित्यापत्तिः तदानींपर्वतोवह्निमानित्यनुमितेरसंभवे

नौकार

विवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितेस्तत्पत्तौबाधकाभावादितिनिर्ष्कृष्टमतोक्तदोषोपिप्रसक्तः।वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमिति
र्हिद्विविधा।एकाउद्देश्यतात्मकवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यताशालिनीअपराचतदितरवह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यता
शालिनीतत्राद्यस्योक्तमतेतौवासंभव॥नाद्वितीयस्यसंभवः पर्वतत्वावच्छिन्नविशेष्यकानुमितिभिन्नायास्तादृशानुमितेरलीकतयातदसंभवादेव
तदसंभवात्तादृशसामान्यसामग्रीसहितायाएवविशेषसामग्र्याः फलोपधायकत्वात्।नचवैशेषिकनमः वह्निव्याप्यालोकादिमत्पर्वतत्वविशिष्टाधि
करणकवैशिष्ट्यबुद्धिविभिन्नायाः पर्वतत्वावच्छिन्नोद्देश्यकानुमितेरलीकत्वेवह्निव्याप्यधूमाभाववान्पर्वतइत्याद्युपनीतमानात्मकबाधनि
श्चयोत्तरोत्पन्नवह्निव्याप्यधूमवान्पर्वतइतिलौकिकप्रत्यक्षात्मकपरामर्शादनुमितिर्नस्यात्।तदानींतादृशविशिष्टाधिकरणकवैशिष्ट्यबोधात्मि
कायाअनुमितेरसंभवात्अनुमितिंप्रतिउपनीतमानात्मकबाधनिश्चयस्य विप्रतिबन्धकत्वादितिवाच्यम्।तत्रतादृशबाधनिश्चयस्यनाशेऽप्रा
माण्यज्ञानेनवानुमितिर्निष्प्रत्यूहेत्युपगमादितिवैशेषिकमतंपरिष्कुर्वन्ति॥तदप्यसत्।विनातादृशबाधनिश्चयस्यनाशंअप्रामाण्यज्ञानंवाअ

लिं· ५

नुमित्यनुत्पत्त्युपगमे ऽनुभवविरोधापत्तेः पर्वतादौ वह्निव्याप्यधूमवान् वह्निव्याप्यधूमव्याप्यव्याप्यवांश्च पर्वत इत्यसमूहालंबनेन परामर्शः ततश्च पर्व
ते वह्नितद्व्याप्यधूमव्याप्ययोर्वानुमितिः स्यात्तस्य च परामर्शनाशस्तत्र चतुर्थक्षणे पर्वते वह्निव्याप्यधूमानुमितेरुत्पत्त्यापत्तेः। अत्र द्वितीयक्षणोत्पन्नानुमि
तौ पर्वते वह्निव्याप्यधूमवत्त्वमानेन न सिद्धिसत्त्वात्· अत्र वह्निव्याप्यधूमवान् वह्निव्याप्यधूमाभावव्याप्यत्ववांश्च पर्वत इति परामर्शस्तत्र तदनन्तरं अनु
मित्युत्पत्त्यापत्तेर्या वह्निव्याप्यधूमवत्त्वं वह्निव्याप्यधूमाभावव्याप्यत्वयोर्युगपत्पर्वते ज्ञानासंभवात्॥ न च तत्र वह्निव्याप्यधूमवत्पर्वतत्वविशिष्टे व
ह्न्यनुमितिर्नैव जायते न तु पर्वते वह्निव्याप्यधूमाभावव्याप्यवत्त्वानुमितिरिति वाच्यं॥ विनिगमनाभावादिति॥ ॥अयं च स्त्रा वह्निव्याप्यधूमवत्पर्वतनिश्चय
त्वेन कारणता धूमलिंगकवह्निविधेयकानुमितित्वेन कार्यतेत्यादिक्रमेण परामर्शानुमित्योः कार्यकारणभावः तत्र धूमलिंगकत्वं न धूमज्ञानजन्यत्वाद
रूपं इत्यनुमितिपरामर्शयोः कार्यकारणभावविचारावसर एव प्रपंचितं किंतु एकत्र द्वयमिति न्यायेन वह्निव्याप्यधूमपर्वतत्वोभयपर्याप्तविशेष्यतावच्छेद
कतावच्छेदकत्वमेव तत्स्थाने स्वसमानाधिकरणत्वे सति स्वाव्यवहितोत्तरत्वसंबंधेन वह्निव्याप्यधूमवत्पर्वतनिश्चयविशिष्टत्वमेव तदस्त्विति वाच्यं॥ स्वत्व

राम ५

×ताकत्वमेव तदस्तु किं व्याप्यत्वप्रवेशेनेति वाच्यं॥ अन्योन्याभावत्वं तत्तदभावभेदेन वह्निव्याप्तीनां नानाविधतया कारणतावच्छेदकम् २

घटितत्वेन संबंधस्याननुगतत्वात्॥ गौरवाच्च- एवमालोकलिंगकत्वमपि निर्वाच्यम्॥ तच्च लिंगोपहितलैंगिकभानं विनाऽनुमितौ न निर्वहतीति सर्व
त्रैवानुमितौ लिंगोपहितलैंगिकभानाभ्युपगमः। वह्निधूमपर्वतत्वोभयपर्याप्तविशेष्यतावच्छेदककोटौ वैकोपादानेन तद्व्यविषयकपरामर्शजन्यायां धू
मपर्वतत्वोभयावच्छिन्नविशेष्यताकवह्निविधेयकानुमितौ व्यभिचारापत्तिनिनतस्तद्वारणाय कारणतावच्छेदककोटौ पर्याप्तेः प्रवेशः कार्यतावच्छेदकेऽपि
तत्पर्याप्तेः प्रवेशस्यावश्यकत्वज्ञापकत्वात्· यदि तु लाघवात्साध्याभाववद्वृत्तित्वज्ञानमेवानुमितिहेतुस्तदा न हेतुतावच्छेदकसंबंधेन हेतुपक्षताव
च्छेदकोभयपर्याप्तविशेष्यतावच्छेदकताकत्वमेव तल्लिंगकत्वं निर्वाच्यं॥ ननु व्याप्तिः प्रवेशनीयाः वह्निव्याप्यधूमवन्महानसमितिपरामर्शजन्यायां वह्नि
व्याप्यधूमधर्मितावच्छेदकवह्निविधेयकानुमितौ व्यभिचारवारणाय पर्वतत्वप्रवेशः। एकत्र द्वयमिति न्यायेन वह्निव्याप्यधूमपर्वतत्वोभयधर्मिताव
च्छेदककवह्निव्याप्यालोकादिमत्त्वनिश्चयजन्यायां तदुभयधर्मितावच्छेदककवह्निविधेयकानुमितौ व्यभिचारवारणाय पर्याप्तिप्रवेशः। तत्र च वह्निव्या
प्यधूमपर्वतत्वोभयं न धर्मितावच्छेदकतापर्याप्त्यधिकरणं वह्निव्याप्यालोकादेरपि तत्र धर्मितावच्छेदकप्रविष्टतया त्रित्वेव तद्धर्मितावच्छेदकत्वस्य

लिं
६

6

पर्याप्तत्वात्· न च वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकत्वमेव तद्व्यक्तौ किमेकत्र द्वयमिति न्यायेनोभयोर्धर्मितावच्छेदकत्वपर्यवसानं नेति वाच्यं।
तथा सति वह्निव्याप्यधूमाभाववान्पर्वत इति स्मरणात्मकबाधनिश्चयोत्तरोत्पन्नवह्निव्याप्यधूमवान्पर्वत इति लौकिकप्रत्यक्षात्मकपरामर्शा
दनुमित्यनुत्पत्त्यापत्तेः। अनुमितिं प्रति स्मरणात्मकबाधनिश्चयस्याप्रतिबंधकतया तादृशबाधनिश्चयसत्त्वे वह्निव्याप्यधूमवान्पर्वतो वह्नि
मानिति परामर्शादनुमितेः संभवात्· तत्र बाधनिश्चयस्य नाशोऽप्रामाण्यज्ञानस्य वाऽनुमितिरित्यभ्युपगमेवानुभवविरोधात्· एकत्र द्वयमिति न्यायेन वह्निव्याप्यधू
मपर्वतत्वोभयावच्छिन्नधर्मिताकानुमितिं प्रति तादृशबाधनिश्चयसत्त्वेऽपि वह्निव्याप्यत्वांशे निर्धर्मितावच्छेदकत्वात्· पूर्वमतदूषणोक्तस्थलयोः अ
नुमित्यपत्त्यापत्त्यसंगात्· न चैवं पर्वतो वह्निमानिति सिद्धिसत्त्वेऽपि विना सिसाधयिषां वह्निव्याप्यधूमवानिति परामर्शादनुमित्यापत्तिः वैशेषिकनये राम
केवलपर्वतत्वावच्छिन्नविशेष्यकानुमितेरलीकतया तादृशसिद्धेरनुमित्यप्रतिबंधकत्वात्· एकत्र द्वयमिति न्यायेन वह्निव्याप्यधूमपर्वतत्वोभयपर्या ६
प्तधर्मितावच्छेदकतानुमितित्वावच्छिन्नं प्रत्येव पर्वतो वह्निमानिति सिद्धेः प्रतिबंधकत्वोपगमे च लिंगभेदेन गुरुतरानंतप्रतिबध्यप्रतिबंधकभावकल्पना

प्रसंगादितिचेन्न।।वैशेषिकमतेहिअनुमितेर्विशेष्यतावच्छेदकताद्वयीएकापरामर्शकार्यतावच्छेदिकापरामर्शविषयीभूतसाध्यव्याप्यहेतुमत्त्वपक्ष
तावच्छेदकोभयपर्याप्तोद्देश्यताख्यविशेष्यतावच्छेदकतारूपा।अतएववह्निव्याप्यधूमवान्पर्वतइतिपरामर्शजन्यानुमितेर्वह्निव्याप्यधूमपर्वतत्वोभ
यविशिष्टेवह्निमनुमिनोमीतिनानुव्यवसायकः।तज्जन्यानुमितौतदुभयोरनुद्देश्यताख्यतावच्छेदकत्वेविरुद्देश्यतानवच्छेदकत्वात्।अपराचपर्वतत्वविशि
ष्टेवह्निमनुमिनोमीत्यनुव्यवसायसिद्धापक्षतावच्छेदकमात्रपर्याप्तोद्देश्यताख्यविशेष्यतावच्छेदकतारूपा:साचपक्षतावच्छेदकावच्छिन्नविशेष्यकसि
ध्यभावस्यकार्यतावच्छेदिकातेनपर्वतोवह्निमानितिसिद्धिसत्त्वेवह्निव्याप्यधूमवान्परामर्शात्पर्वतइतिपत्रानुमितिःपर्वतत्वावच्छिन्नविशेष्यकसिध्य
भावविरहात्।तत्रतथापितादृशसिध्यभावसत्त्वात्पर्वतत्वपर्याप्तोद्देश्यतावच्छेदकताकानुमितेस्तत्रसंभवेपिवह्निव्याप्यधूमपर्वतत्वोभयपर्याप्तानु
द्देश्यताख्यविशेष्यताख्यावच्छेदकताकानुमितेस्तत्रबाधकाभावइतिवाच्यं।।पर्वतत्वपर्याप्तोद्देश्यतावच्छेदकताकानुमितेस्त्वितिमभिप्रायात्तादृशविशेष्य
तावच्छेदकताकानुमितेरलीकतयासामान्यसामग्रीविरहादेवतादृशानुमितेरनुत्पत्तेः।एतेनवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शविरहदशायामपिसि

लिं
७
7

ध्यमात्रवमात्रात्पर्वतो वह्निमानिति पर्वतत्वपर्याप्तोद्देश्यतावच्छेदकताकानुमित्यापत्तिः। तादृशानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यकसिद्ध्यभाव
मात्रस्य हेतुत्वादिति पि प्रसक्तं। वह्निव्याप्यधूमादिपर्वतत्वोभयपर्याप्तानुद्देश्यताख्यविशेष्यतावच्छेदकताकानुमितिभिन्नायाः पर्वतत्वपर्याप्तोद्देश्य
तावच्छेदकताकानुमितेरलीकतापत्तिः कारणसमाजविरहात् तदानीं तादृशानुमितेरनुमितेरनुत्पन्नेः। न चैवं वह्निव्याप्यधूमवत्पर्वतान्निश्चयस्य वह्निव्या
प्यधूमपर्वतत्वोभयपर्याप्तानुद्देश्यत्वाख्यविशेष्यतावच्छेदकताकवह्निविधेयकानुमितित्वं कार्यतावच्छेदकं न संभवति एकत्र द्वयमिति न्यायेन वह्निव्याप्यधू
मपर्वतत्वोभयधर्मितावच्छेदकताकवह्निव्याप्यालोकादिपरामर्शजन्यानुमितौ व्यभिचारात्। ईदृशपरामर्शजन्यानुमितेर्विशेष्यतावच्छेदकताकत्वस्य द्वित्वावच्छिन्नव
ह्निव्याप्यधूमपर्वतत्वोभयोरपि पर्याप्तत्वस्यावश्यवक्तव्यत्वात्। अन्यथा एकत्र द्वयमिति न्यायेन वह्निव्याप्यधूमपर्वतत्वोभयमात्रपर्याप्तधर्मितावच्छेदक
ताक— द्विसत्त्वेऽपि तादृशपरामर्शाद् अनुमित्यापत्तेः। तादृशसिद्धेस्तदुभयमात्रावच्छिन्नोद्देश्यताकानुमितिं प्रति येव प्रतिबंधकत्वादिति चेन्न॥ तादृशपराम राम ७
र्शजन्यानुमितेरुद्देश्यताख्यविशेष्यतावच्छेदकत्वस्य तदुभयमात्रपर्याप्तत्वेऽपि त्रेऽनुद्देश्यताख्यविशेष्यतावच्छेदकत्वस्य तदुभयमात्रापर्याप्तत्वात्। न चैवम
नुमितेः परामर्शकार्यतावच्छेदकतया निरुक्तलिंगोपधानविषयत्वसिद्धिरिति फलितं तत्र त्वदुक्तकार्यतावच्छेदकतया जात्यतिरिक्तपदार्थस्यासिद्धेः

अन्यथा तदुभयपर्याप्तानुद्देश्यताख्यविशेष्यतावच्छेदकताकानुमितित्वमपेक्ष्य लाघवेनातंजोकापिविशेषस्यैव कार्यतावच्छेदकतयावक्तुमुचितत्वादित्याशयः प्रा
मतिरिक्तपदार्थस्य स्वरूपासिद्धेः कार्यतावच्छेदकतयानभ्युपगमात्. प्रकृते च साध्यव्याप्यहेतुपक्षतावच्छेदकोभयपर्याप्तानुद्देश्यताख्य ख्यविषयतावच्छेदकत्वरूपे
गोपधोनविषयत्वं प्रत्यक्षादावनुभवसिद्धं तच्च वह्निव्याप्यधूमवान्पर्वत इतिपरामर्शजन्यानुमितिर्वह्निव्याप्यधूमपर्वतत्वोभयमात्रावच्छिन्नविशेष्यताकत्वतदभावान्यतर
वतीप्रमेयत्वादित्याद्यनुमानीतपरामर्शानुमितिकार्यकारणभावलाघवतः प्रकृतेसहकृतादनुमितावविशिष्टानीत्यभ्युपगमात्। न च तथापि पर्वतत्वादिविशिष्टपक्षक
परामर्शजन्यानुमितौ कार्यकारणभावबलान्निरुक्तलिंगोपधानविषयत्वसिद्धावपि वह्निव्याप्यालोकवान्वह्निव्याप्यालोकवान्व्याप्यधूमवानित्यादिरूपवह्नि
व्याप्यधूमादिपक्षकालोकादिलिंगकपरामर्शजन्यानुमितौ निरुक्तलिंगोपधानविषयत्वेमानाभावः। न च तत्रापि एकत्र द्वयमिति न्यायेन वह्निव्याप्यालोकवह्नि
व्याप्यधूमवत्त्वरूपपक्षतावच्छेदकोभयपर्याप्तानुद्देश्यताख्यविशेष्यतावच्छेदकताकवह्निविधेयकानुमितित्वस्य तादृशपरामर्शकार्यतावच्छेदकतया कार्यकारणभाव
बलात्तत्रापि निरुक्तलिंगोपधानविषयत्वसिद्धिरिति वाच्यं। तादृशवह्निविधेयकानुमितित्वस्य वह्निव्याप्यालोकादिपक्षकधूमलिंगकपरामर्शजन्यानुमितावप्यनुप

लिं० ६ गमेनव्यभिचारापत्त्यातादृशपरामर्शकार्यतावच्छेदकत्वासंभवादिति चेन्ः मास्तु न लिंगोपधानविषयत्वं तथापि पर्वतत्वादिविशिष्टपक्षकपरामर्शजन्यानुमितौ
कार्यकारणभावबलान्निरुक्तलिंगोपधानाविषयकत्वासिद्धेरप्रत्यूहात्ः पक्षतावच्छेदकादिभेदेनानुमितिपरामर्शयोः कार्यकारणभावभेदस्य सर्वसिद्धतया वह्निव्या
प्यधूमवत्पक्षकालोकादिलिंगकपरामर्शस्यानायत्यानिरुक्तामवहितोत्तरवर्त्तित्वसंबंधेन तादृशपरामर्शविशिष्टानुमितित्वस्य कार्यतावच्छेदकत्वादिति वैशेषिक
मतं परिष्कुर्वन्ति। तदत्तिस्थवीयम्। पर्वतो वह्निमानित्यनुमितौ प्रमाणान्तरासिद्धस्यापि निरुक्तलिंगोपधानविषयत्वस्य वह्निव्याप्यधूमवत्पर्वतनिष्ठं यज्जन्यताव
च्छेदकं चैतदपेक्षया लाघवेन घटत्वादिनिर्विकल्पकविषयत्वस्यैव कार्यतावच्छेदकतायावत्कॢप्तवितत्वात्। कार्यकारणभावबलात्सर्वत्रैव वह्निव्याप्यधूमव
त्पर्वतनिष्ठयजन्यानुमितौ घटत्वं भासतइत्यस्यापि ध्रुववत्त्वात्ः नच घटत्वादिनिर्विकल्पकविषयत्वमादायविनिगमनाविरहइतिवाच्यं। तत्रापि तत्स[illegible]वीरत्वा राम ६
दितिकृतं पल्लवितेन॥ ॥छ॥ ॥इतिलिंगोपहितलैंगिकभाननिरासरहस्यं॥ ॥शुभमस्तु॥ ॥

२५६